# संस्कृतम्

सम् – कृ + क्त (कर्मणि)

संपरिभ्यां करोतौ भूषणे (६.१.१३७)

# व्याकरणम्

व्याक्रियन्ते प्रकृतिप्रत्ययादि-विभागेन शब्दानेन इति व्याकरणम्

वि – आ – कृ + ल्युट् (करणे)

वि – आ– कृ + यु (हलन्त्यम्–१.३.३,

लशक्वतद्धिते–१.३.८)

वि – आ – कृ + अन (युवोरनाकौ –७.१.१)

व्याकरण

समुद्रवद् व्याकरणं महेश्वरे
तदर्द्धकुम्भोद्द्धरणं वृहस्पतौ।
तद्भागभागाच्च शतं पुरन्दरे
कुशाग्रविन्दुत्पतितं हि पाणिनौ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिणये नमः॥

(पाणिनीय–शिक्षा)

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

(काशिका – नन्दिकेश्वरः)


अइउण्
ऋऌक्
एओङ्
ऐऔच्
हयवरट्
लण्
ञमङणनम्
झभञ्
घढधष्
जबगडदश्
खफछठथचटतव्
कपय्
शषसर्
हल्

# माहेश्वर–सूत्रानि

१. अ इ उ ण्

२. ऋ ऌ क्

३. ए ओ ङ्

४. ऐ औ च्

५. ह य व र ट्

६. ल ण्

७. ञ म ङ ण न म्

८. झ भ ञ्

९. घ ढ ध ष्

१०. ज ब ग ड श्

११. ख फ छ ठ थ च ट त व्

१२. क प य्

१३. श ष स र्

१४. ह ल्

# सूत्र–लक्षणम्

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

# वार्तिक–लक्षणम्

उक्तानुक्तदुरुक्तार्थव्यक्तिकारि तु वार्तिकम्

# भाष्य–लक्षणम्

सूत्रार्थो वर्ण्यते यत्र वक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

# परिभाषा

## अनियमे नियमकारिणी परिभाषा

एकदेशस्थितः शास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते॥

भाष्यकारः

# प्रत्याहारः

हलन्त्यम् (१.३.३)

आदिरन्त्येन सहेता (१.१.७१)

अ+ण्>अण् = अ इ उ

अ+क्>अक् = अ इ उ ऋ ऌ

अ+च्> अच् = अ इ उ ऋ ऌ ए ओ ऐ औ

इ+क्> इक् = इ उ ऋ ऌ